# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. SECOND SEMESTER EXAMINATION, MAY 2017**
**FIRST YEAR [BATCH 2016-19]**
**SANSKRIT (Honours)**
**Paper : II**

Date : 18/05/2017
Time : 11 am – 3 pm
Full Marks : 100

1. **एक:** प्रश्न: समाधेय:। [1×10]
   क) बाणभट्टस्य रचनाशैली सोदाहरणं प्रदर्श्यताम्।
   ख) राजानो धूर्तै: कथंकारं प्रतार्यन्ते? प्रतार्यमाणानां तेषामाचरणं कीदृशं भवति? —सर्वं पाठ्यांशानुसारं वर्णनीयम्। [5+5]

2. वङ्गभाषया आङ्गलभाषया वा अनुच्छेद**द्वयस्य** अनुवाद: कार्य:। [2×4]
   क) कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम्, अवनमय द्विषतां शिरांसि, उन्नमय बन्धुवर्गम्, अभिषेकानन्तरं च प्रारब्धदिग्विजय: परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।
   ख) तथा प्रयतेथा यथा नोपहस्यसे जनैर्न निन्द्यसे साधुभिर्न धिक्क्रियसे गुरुभिर्नोपालभ्यसे सुहृद्भिर्न शोच्यसे विद्वद्भि:। यथा च न प्रकाश्यसे विटैर्न प्रहस्यसे कुशलैर्नास्वाद्यसे भुजङ्गैर्नावलुप्यसे सेवकबृकैर्न वञ्च्यसे धूर्तै:...।
   ग) किं वा तेषां साम्प्रतं येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणमभिचारक्रियाक्रूरैकप्रकृतय: पुरोधसो गुरव:, पराभिसन्धानपरा मन्त्रिण उपदेष्टारो नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यामासक्ति:...।
   घ) उपशान्तवचसि शुकनासे चन्द्रापीडस्ताभिरमलाभि: उपदेशवाग्भि: प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव, निर्मृष्ट इव, अभिषिक्त इव, अभिलिप्त इव, अलङ्कृत इव, पवित्रीकृत इव, उद्भासित इव, प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम।

3. सन्दर्भ **एक:** सप्रसङ्गं व्याख्यायताम्। [1×7]
   क) विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मी:...।
   ख) आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति।

4. **एक** प्रश्न: समाधेय:। [1×10]
   क) को नाम ब्रह्मचारी? कुत: कथञ्च स प्रत्यागत:? नाटके कस्तावदुपयोगस्तस्य? [1+2+7]
   ख) स्वप्ननाटकस्य वस्तु कुत आहृतम्? मौलं वस्तु संक्षेपेण वर्णनीयम्। नाट्यकृतात्र नाटके नूतनं किं कृतम्? [1+4+5]

5. वङ्गभाषया आङ्गलभाषया वा पद्यस्यै**कस्या**नुवाद: कार्य:। [1×5]
   क) उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम्।
   पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ <u>पाताम्</u>।।
   ख) उपेत्य नागेन्द्रतुरङ्गतीर्णे तमारुणिं <u>दारुणकर्मदक्षम्</u>।
   विकीर्णबाणोग्रतरङ्गभङ्गे महार्णवाभे <u>युधि</u> नाशयामि।।

6. पद्य**मेकं** सप्रसङ्गं व्याख्यायताम्। [1×7]
   क) धन्या सा स्त्री यां तथा वेत्ति भर्ता
   <u>भर्तृस्नेहात्</u> सा हि दग्धाप्यदग्धा।।
   ख) इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
   कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातर:।।

7. क) व्युत्पत्तिर्निर्णेया— 5(क) इत्यत्र पाताम् इत्यस्य [1×1]
   5(ख) इत्यत्र युधि इत्यस्य **वा**।

खः) सव्यासवाक्यं समासनाम लेख्यम्। [1×2]

5(क) इत्यत्र भर्तृस्नेहात् इत्यस्य

5(ख) इत्यत्र दारुणकर्मदक्षम् इत्यस्य **वा**

8. **एकः** प्रश्नः समाधेयः। [1×10]

क) ''...स वर्णिलिङ्गी विदितः समाययौ...''— केन विरचितस्य कस्य महाकाव्यस्य किंनामके सर्गे कस्मिन् समुपलभ्यतेऽयं पद्यांशः ? 'वर्ण'-शब्दस्य कस्तावदर्थः प्रसङ्गेऽस्मिन् मल्लिनाथसम्मतः ? विदितो वर्णिलिङ्गी कुत्र समाजगाम ? तस्य वेदनं समासेनोपन्यसनीयम्। [2+2+1+5]

ख) वचन**युगल**स्यान्तर्निहितार्थः प्रकाश्यः। [2×5]

i) विचित्ररूपाः खलु चित्तवृत्तयः।

ii) परैरपर्यासितवीर्यसम्पदां
पराभवोऽप्युत्सव एव मानिनाम्।

iii) हितं मनोहारि च दुर्लभं वचः।

9. वङ्गभाषया आङ्गलभाषया वा अनूद्यतां पद्य**मेकम्**। [1×5]

क) भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम्।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः।।

ख) विहाय शान्तिं नृप धाम तत् पुनः
प्रसीद सन्धेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः।।

10. पद्य**मेकं** सप्रसङ्गं व्याख्येयम्। [1×7]

क) व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
नसंवृताङ्गान् निशिता इवेषवः।।

ख) सुखेन लभ्या दधतः कृषीवलै-
रकृष्टपच्या इव शस्यसम्पदः।
वितन्वति क्षेममदेवमातृका-
श्चिराय तस्मिन् कुरवश्चकासति।।

11. क) सविग्रहवाक्यं समासनाम निर्णेयम्। [1×2]

9(क) इत्यत्र निरस्तनारीसमयाः इत्यस्य

9(ख) इत्यत्र निःस्पृहाः इत्यस्य **वा**

ख) व्युत्पत्तिर्निर्णेया— 9(क) इत्यत्र व्यवसाययन्ति इत्यस्य [1×1]

9(ख) इत्यत्र सन्धेहि इत्यस्य **वा**।

12. **एक:** प्रश्न: समाधेय:। [1×10]

क) का हंसपदिका ? शाकुन्तले कुत्र तस्या आविर्भाव: ? तस्या गीतस्य संस्कृतरूपम् उद्धरणीयम् ? गीतस्याभिधेयार्थ: क: ? कश्च व्यङ्ग्यार्थ: ? वर्तमाननाटके हंसपदिकावृत्तं यथा प्राप्यते तत् समासेन उपन्यस्य तद्गुरुत्वं निर्णेयम्। [0·5+0·5+2+1+1+2+3]

ख) शाकुन्तले कस्तावज्जन: केन जनेन शप्त: ? अभिशापवाणी समुद्धरणीया। नाटकेऽत्र का तावदुपयोगितास्याभिशापस्य ? [1+2+7]

13. वङ्गभाषया आङ्गलभाषया वानूद्यतां पद्य**मेकम्**। [1×5]

क) सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्या:
सम्भावनागुणमवेहि तमीश्वराणाम्।
किं वाभविष्यदरुणस्तमसां विभेत्ता
तं चेत् सहस्रकिरणो धुरि नाकरिष्यत्।।

ख) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आदौ व: कुसुमप्रसूतिसमये यस्या भवत्युत्सव:
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।

14. पद्य**मेकं** सप्रसङ्गं व्याख्यायताम्। [1×6]

क) अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतु:।
जातो ममायं विशद: प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा।।

ख) भवन्ति नम्रास्तरव: फलागमै–
र्नवाम्बुभिर्दूरविलम्बिनो घना:।
अनुद्धता: सत्पुरुषा: समृद्धिभि:
स्वभाव एवैष परोपकारिणाम्।।

15. यस्य कस्या**प्येकस्य** संस्कृतरूपं देवनागर्या लेख्यम्। [1×4]

क) जं भवं आणबेदि। भो वअस्स, गहीदस्स ताए परकीएहिं हत्थेहिं सिहण्डए ताडीअमाणस्स अच्छराए वीदराअस्स विअ णत्थि दाणिं मे मोक्खो।

ख) शहजे किल जे विणिन्दिए
णहु दे कम्म विवज्जणीअए।
पशु–मालण–कम्म–दालुणे
अनुकम्पा–मिदुए बि शोत्तिए।।

—————— × ——————